श्री दक्षिणकाळी कवचं

श्री दक्षिणकाळी कवचं

भैरव उवाच |
काळिका या महाविद्या कथिता भुवि दुर्लभा |
तथाऽपि हृदये शल्यमस्ति देवि कृपां कुरु || 1 ||

कवचस्तु महादेवि कथयस्वानुकंपया |
यदि नो कथ्यते मातर्विमुंचामि तदा तनुं || 2 ||

श्रीदेव्युवाच |
शंकापि जायते वत्स तव स्नेहात् प्रकाशितं |
न वक्तव्यं न द्रष्टव्यमतिगुह्यतरं महत् || 3 ||

काळिका जगतां माता शोकदुःखविनाशिनी |
विशेषतः कलियुगे महापातकहारिणी || 4 ||

अथ कवचं –
काळी मे पुरतः पातु पृष्ठतश्च कपालिनी |
कुल्ला मे दक्षिणे पातु कुरुकुल्ला तथोत्तरे || 5 ||

विरोधिनी शिरः पातु विप्रचित्ता तु चक्षुषी |
उग्रा मे नासिकां पातु कर्णौ चोग्रप्रभा मता || 6 ||

वदनं पातु मे दीप्ता नीला च चिबुकं सदा |
घना ग्रीवं सदा पातु बलाका बाहुयुग्मकं || 7 ||

मात्रा पातु करद्वंद्वं वक्षो मुद्रा सदावतु |
मिता पातु स्तनद्वंद्वं योनिमंडलदेवता || 8 ||

ब्राह्मी मे जठरं पातु नाभिं नारायणी तथा |
ऊरू माहेश्वरी नित्यं चामुंडा पातु लिंगकं || 9 ||

कौमारी च कटिं पातु तथैव जानुयुग्मकं |
अपराजिता च पादौ मे वाराही पातु चांगुळीन् || 10 ||

संधिस्थानं नारसिंही पत्रस्था देवतावतु |
रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु || 11 ||

तत्सर्वं रक्ष मे देवि काळिके घोरदक्षिणे |
ऊर्ध्वमधस्तथा दिक्षु पातु देवी स्वयं वपुः || 12 ||

हिंस्रेभ्यः सर्वदा पातु साधकं च जलाधिकात् |
दक्षिणाकाळिका देवी व्यापकत्वे सदावतु || 13 ||

इदं कवचमज्ञात्वा यो जपेद्देवदक्षिणां |
न पूजाफलमाप्नोति विघ्नस्तस्य पदे पदे || 14 ||

कवचेनावृतो नित्यं यत्र यत्रैव गच्छति |
तत्र तत्राऽभयं तस्य न क्षोभं विद्यते क्वचित् || 15 ||

इति काळीकुलसर्वस्वे श्री दक्षिणकाळिका कवचं |